Shri Raghunath Temple MSS. Library,
JAMMU

No. ४२६५

Title शास्त्र दीपिका प्रकाशः
७मा ध्यायः

Author श्री चम्पकनाथः

Extent १४ Age –

Subject पू. मीमांसाशास्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

प्रश्नदीपिकाप्रकाशसप्तमाध्याय।

धरद्द५

© Dharmartha Trust J&K. Digitized by eGangotri

२४

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰टी॰ ७

१

श्रीमते रामानुजाय नमः॥ ॥श्रुति॥ वृत्तानुवादपूर्वकं संगतिं दर्शयन्वर्तिष्यमाणं प्रतिजानी
ते। उपदेश इति। इत्थं कुर्यादिति पूर्वषट्के कृत्स्नोपदेशविचाराधीनत्वात्तत्कुर्यादित्युत्तरषट्क
भावातिदेशविचारस्य षट्कयोर्हेतुहेतुमत्त्वसंगतिरिति भावः। यद्यप्यन्यत्रेवाप्यध्याये
योरेव भावाच्चानयोरुपदेशत्वातिदेशत्वरूपैककारार्थकत्वेनाध्यायद्वयस्यानीयन्तयाष
ट्कयोरेवोक्तानाध्याययोः तत्राद्याधिकरणमवतारयति तदुपेति। उपोद्घातत्वमुपपादय
ति। यदीति। धर्मसद्भावः सप्तमे तद्विशेषोऽष्टमे ऊहो नवमे बाधो दशमे ऽत्रादिनातिदिष्टप
दार्थविषयत्वेन संगोगृह्येते। तदर्थमिति। अयमत्र चिन्ताक्रमः। उत्तरषट्कं किमारभ
णीयं नवेति चिन्तातदर्थं मन्यते किं सौर्यादिविधानादिदेशेन धर्मा भवन्त्युत नेति तदर्थं किं वा जादयो
धर्माः सर्वयागार्थत्वेनोपदिश्यन्ते उत यथाप्रकरणं व्यवतिष्ठन्त इति तदर्थं किं यजिप्रयुक्ता
धर्मा उतापूर्वप्रयुक्ता इति। तदर्थं किं यज्यर्थी धर्मा उतापूर्वार्था इति। तत्रैव यज्यर्थत्वे हेतुर्योजि
प्रयुक्ता इति। ननु यज्यर्थत्वेऽपि तद्द्वारापूर्वसंबन्धस्य सौकर्यान्नेदं सिद्धान्तविरुद्धमित्याशंक्य

श्री एम॰
१

© Dharmartha Trust J&K. Digitized by eGangotri

यज्यर्थत्वकोटेस्तात्पर्यमाह प्रधानमिति। यजिभावनेति। नासाधितंकरणमिति न्यायादर्थोस्ति
प्र यागकर्मकभावनेत्यर्थः। तद्द्वारा। यागकर्मकभावनाद्वारा। अपूर्वे प्रयुक्तत्वे हेतुरपूर्वार्थोइ
ति। इतिकर्तव्यतायाः करणार्थत्वेनेवापूर्वभावनापेक्षितत्वात्तदपेक्षाविरोधमाशंक्यापूर्वार्थत्व
कोटेस्तात्पर्यमाह अपूर्वभावनयेति। तथाच यागसंबंधपूर्वकोऽपूर्वे भावनासंबंधः उक्तस्तत्पूर्वको
यागसंबंधइति निष्कर्षः। नचेति। इतिकर्तव्यतायाः करणानुग्राहकत्वादिति भावः। तुल्येति।
प्रधानभूतभावनान्वयसाम्यादिति भावः। तस्मात्पूर्वभावनाकरणेन्वयासंभवात्। अनुमि
तेनेति। श्रुतस्य दर्शपूर्णमासयागस्य फलसंबंधपरत्वादिति भावः। यजतिरिति। कर्तव्यतावि
शेषरूपेतिकर्तव्यतान्वयापकर्तव्यताबोधकं यजेनेत्याख्यातपदमेव कल्प्यमित्यर्थः। नन्वंग
प्रधानानां वाक्यानामेकवाक्यतेव कल्प्या किं वाक्यांतरकल्पनेनेत्याशंक्याह नचेति एतस्मिन्प्रथ
म एव धर्माणां संगमार्थत्वपक्षेत्वित्यर्थः। वैरूप्यविरुद्धत्रिकद्वयं। प्रयागनियदेकवाक्यत्वाभावा
दिति भावः। कल्पितयजेः साधारण्येपि प्रकरणविशेषणांतरानुपस्थापकत्वादिति भावः। अस्त
विशेषितस्य विशेषविषयत्वमस्तु नेत्याह नचेति। प्रकरणस्याकांक्षारूपस्यान्वयबोधमात्रसामर्थ्याद ४१

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰७ तर्हिसन्निधिनाविशेषलाभस्तत्राहसन्निधेश्चेतिंगसमेवेति।श्रुतेनैवोपपन्नत्वाच्छ्रुतेनकल्प्य
२ मितिभावः।अन्येनेति।अत्रत्ययाजिनेत्यर्थः।विधीयंतनेइति।समिदादिवाक्यस्थविधिभिरि
तिशेषःफलवतइति।स्वरूपकथनंप्रायिकाभिप्रायमतोनविशिष्टोदृष्टादोषोदीक्षणीया
दिसाधारण्येपिचादीक्षणीयादीनामपूर्वकालत्वात्प्राप्येणत्युक्तं।प्रत्यक्षगृहीतयज्यथैना
कत्रीत्यादिसामान्यादपिसमिदादीनांयज्यर्थत्वमित्याह।किंचेति।तत्सामान्यादितिरेवतथा
त्वमितिसौडुंबराधिकरणगुणसूत्रंत्रिपाद्यामेवव्याख्यातं।नन्वदेशकस्ययजनेरनुवादत्वेनस
न्निहितगामित्वात्पारिप्लवंतत्राहयद्यपीतिभावनयेति।सिद्धान्तरीत्येतिभावः।प्रधानवि
धिवाक्यंदर्शपूर्णमासवाक्यंअंगवाक्यंसमिदादिवाक्यंत्वपूर्वभावनांफलभावनांतथाचैक
भावनान्वितधर्माणांतदीयकरणएवान्वयात्तन्भावनांतरकरणसंबंधइत्यर्थः।सर्वेभ्यःका श्रीरामः
मेभ्यइतिसामान्यवचनापेक्षयाशीघ्रप्रवृत्तविशेषवचनस्यैवफलसंबंधबोधकत्वादितिभावः। २
आर्थिकइति।एकभावनान्वितानामप्यग्रहणोकहायनीन्यायेनयथायोग्यमन्वयइत्यर्थः।यद्

© Dharmartha Trust J&K. Digitized by eGangotri

क्षं भावनान्वये तुल्यकक्षत्वात्करणान्वय इति तत्राह भावनेति। भावनायाः किं केन कथं भा
व्येत्याकांक्षानुरोधेन स्वर्गयागसमिदादीनां भाव्यकरणेतिकर्तव्यतात्वेनैव संबंधादिति भा
वः॥ प्राधान्यमिति प्रतिपद्यत इत्यत उच्यते। इतोऽपि न तुल्यकक्षत्वमित्याह इदमिति। तस्मा
दिति करणत्वव्यापारत्वान्यथानुपपत्तेरित्यर्थः। यजेर्धर्मोन्वयायोग्यत्वादपि न तदुद्देशेन धर्म
विधानमित्याह नचेति। कथंभावयेदिति। वत्कथंयागा इत्यनपेक्षणादिति भावः। तर्हि यागभाव
नाद्वारैव यागस्येतिकर्तव्यतास्तु कथं यागः कर्तव्य इत्यपेक्षासत्त्वात्तत्राह नापीति। अपेक्षा
सन्निधीति। कीदृशोसौ व्यापारविशेष इत्याकांक्षया सन्निधिना सामान्यस्य विशेषान्वययो
ग्यत्वाच्चेत्यर्थः। अध्यवसीयत इति। तथा च तन्मनामार्थकस्य यजेतेत्यस्यापि स एवार्थ इ
त्यर्थः। अपारिप्लवत्वमिति। परिप्लवः प्लवतीति परिप्लवास्त एव पारिप्लवास्तेषां भावस्तत्त्वं तद
भावः अचाञ्चल्यमित्यर्थः। द्रव्यादीनां प्रत्यक्षेण यजिनिर्वर्तकत्वेपि यागसंपादनस्यापि फल
भावनांशत्वात्फलभावनान्वयः सुलभ इत्याह व्रीहीति। प्रमाणान्तरवशात्तद्व्याख्यास्यादित्याह

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰७ कथमत्यन्तवधानात्। किं तदतिदेशानं तदाह अतिदेशो नामेति। अन्यधर्मत्वेनावगतानां तत्संबं-
३ धादेरन्यत्र प्रदेशेऽर्पणं येन व्यापारेण भवति सोऽतिदेशः। अतीत्य व्यपदेशोऽतिदेश इत्यस्य व्या-
पारवाचकतां नेत्यत्र बो- त्याच्छात्व्यस्याप्पत्ति देशान्ववहारः करणव्युत्पत्येति बोध्यं। ननु श्लोके को-
3 केन लक्षणेन त्वसमानेष्वित्यनुपपन्नं वचनानामनिमित्तातिदेशेषु विकृतेः प्रकृतिसामान्यानाव-
श्यकत्वादित्याशंक्य साम्योक्तिः प्रायिकत्वाभिप्रायेणात एव यत्तच्छब्दादित्यभिप्रायवाक्यभेदे-
न व्याचष्टे। अत्रेति। सत्त्वे मुख्यानामपूर्वाणां भेदे यथाऽधिकारं यथाप्रकरणं धर्माणां भावोऽ-
वस्थानं स्यात्। शेषशेषिभावस्य श्रुत्यैकगम्यत्वात्। समा॥ संज्ञायोपयोगिनमापरि क्कुर्वन्-
विषयं दर्शयति। इषाविति। इषुणाभिचरन्यजेतेति विहिते एकाहत्वेन ज्योतिष्टोमविकारे इ-
त्यर्थः। इषुर्विष्टुतिः कुशास्तरणमिषाकारेण कर्तव्यमित्यर्थः। इषुभिरेव कर्तव्यमित्यन्वयः। स- श्रीरामः
मा। हमिति सप्तहारवं साम स्तोत्रसाधनं भवतीत्यर्थः। स्तोत्रेति। साक्षात्परंपरया वा स्तोत्रसंबंधि- ३
त्वात्स्तोत्रविकारत्वोक्तिः अनुवादइति। ज्योतिष्टोमिकधर्मप्रयुक्तव्यपदेन साहश्यानुवाद इत्य-

© Dharmartha Trust J&K. Digitized by eGangotri

ति

र्थः। सन्निहितेति। पूर्वोक्तादन्यद्यत्सन्निहितं तद्वाचित्वादित्यर्थः। आम्नातस्विति इषाविति शे
षः॥ विद्यमानः चोदकप्राप्तत्वादिति शेषः। अनुवाद इति। धर्मोद्धारार्थो श्येन साहचर्यप्रतीते
सद्वादेशकार्य इति सङ्केतलाभान्नानुवादवैयर्थ्यमिति भावः। भाष्यरीत्या सिद्धान्तयति
सत्यमिति किं त्विति। चैत्राय क्षौमं मैत्राय कौशेयमितरद्धूतायेत्युक्ते पूर्वोक्तसदृशं वस्त्र
मेव सन्निहितं प्रतीयते न तु स्वर्णमित्यर्थः। अर्थवत्त्वायेति। प्रदेशान्तरस्थत्वेनेषु वाक्येक
वाक्यत्वाभावान्न स्कन्धसर्थत्वमिति भावः। विशेषिकाणामिति। इतरग्रहणेनेषु विहितादधिक
स्य श्येनविहितस्य प्रतीतेः श्येनवैशेषिकाणां प्राकृतविकाराणां लोहितोष्णीषत्वादीनामप्रा
कृतविकाराणां च कण्टकचितोदनादीनां प्रापकोऽयं वाक्यशेषो विधिरित्यर्थः। किं विद्रूपेण बुद्धिस्थेषौ क
स्मिंस्तु प्रयुक्तेऽवशिष्टमितरशब्दार्थः। न चाव चोदकप्राप्तत्वेन बुद्धिस्थेषु धर्मेषु विद्धस्यादविकारवि
धानार्थमुपयुक्तत्वेनावशिष्टं ज्योतिष्टोमिकं श्येने यादृशविकारयुक्तं तादृशविकारयुक्तं कार्यमिति
सिद्धेः सन्निहितसदृशयोनेकस्यापि हानमिति वार्त्तिकरीत्याह यद्वेति। सन्निहितवचनत्वमिति सदृशाव च

© Dharmartha Trust J&K. Digitized by eGangotri

७ शा०टी० ४

न त्वस्यास्तूपलक्षणं अस्मिंश्च सत्प्राकृतोद्देशो न विकारमात्रोपदेशान्नश्येन गन लोहितोष्णीषत्वा
दिविकारमात्रस्यातिदेशो नाम्ना कृतकार्याणां कंटकचितोद्दनादीनां। सत्रे समानमितरदिति वाक्ये
उत्सन्नाधिकारस्थोदकावगतनिर्देशः स्यात्सर्वत्वात्तद्दृष्टो ज्योतिष्टोमलक्षणाप्रकृतिष्ठत्वात्। पंच
प्रयुक्तोधिकरणोभावनया साक्षाद्दकावगतनिर्देशः स्यात्सर्वत्वात्तद्दृष्टो ज्योतिष्टोमलक्षणाप्रकृति
मत्वाच्च। पंच। प्रयुक्तोधिकरणो भावनया साक्षादपेक्षितधर्मो निर्देश उक्तः इदानीं ततो जघन्यो धर्मबो
धकब्राह्मणातिदेश इति संगतिः। नक्षेति वैश्वदेवेन यजेत आग्नेयमष्टाकपालं निर्वपति सोम्यं चरुं
सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथि
व्यमेककपालमित्यष्टौ हवींष्याम्नातानि तथा वरुणप्रघासेष्वपि नेवाघानि पंच हवींष्याम्नायन्ते तेषु
न्द्राग्नि वैश्वदेविकानि यद्ब्राह्मणान्येतद्ब्राह्मणान्येव वरुणप्रघासिकानि पंच हवींषीति ब्राह्मणाम
तिदिष्टमित्यर्थः। अर्थवादातिदेशफलमाह सेवमिति ब्राह्मणा ... स्यांगविधिसाधारणं वाक्य
ति सर्वेषामिति चोद्यंत इति प्रधानानीति शेषः। न ह्यर्थवादानामप्यविधायकत्वाद्ब्राह्मणवाद

श्रीरामः ४

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणात्वावन्न निर्देशस्तत्राह सार्थवादकमिति। विधेयैकवाक्यतया विधायकत्वमित्यर्थः। संबंध
परंपरासंबंधः। अंगविधीनामपि विध्येकवाक्यत्वेन विधायकत्वमस्तीत्याह किंचेति सूत्रे। आग्ने
यादीनि पंच हवींषि सर्वेषु पर्वसु संचरन्तीति संचराणि तेष्वर्थवादातिदेशः हविर्विधायकेन तया
हविःसन्निधानात्॥ एक॥ उक्तं शेषं पूर्वेणैव गतत्वेन पृथगतिदेशो वेद्य इत्यादि इति भावः॥ एक। ए
तद्ब्राह्मणं इति। साकमेधेष्वयमाण इति शेषः। पूर्वं सामान्यतः सिद्धस्य कृत्स्नकाण्डातिदेशस्य वि
शेषविचारात्संगतिः। वारुणप्रघासिक इति शमीमय्यः स्रुचो भवन्तीत्याद्यल्पमेव वैशेषिकं। वै
श्वदेविके तु शतिष्ठितो होतव्यः बर्हिर्नीयाविः षष्ठं कुर्यादित्यादयो बहवो वैशेषिका इत्यर्थः। सूत्रे
एककपालानां सर्वेषां वैश्वदेविकः प्रकृतिः। आग्रयणे यत्सर्वहुतं करोति साल्वेकापरिचक्षायद्धु
ताद्धुतः पर्यावर्तते सा द्वितीया तस्मादाज्यस्यैव द्यावापृथिव्यो यजेतेत्याज्यविधिपरे सर्वहोमस्यापर्या
वर्तनस्य दर्शनादवश्यं भक्षे चेदमेवैककपालस्याद्विरवघ्रातीति द्विरवदानवचनादन्यत्र नाद्विरवदानमि
ति गम्यते नत एवं चैककपालानां सर्वेषां वैश्वदेविकः प्रकृतिरिति सिद्धत्वात्तद्विषयत्ववचनानर्थक्यं

© Dharmartha Trust J&K. Digitized by eGangotri

शा.टी.७ स्यादिति वाहणाव घासिकातिदेशः॥ ॥इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्याने प्रकाशा
५ ख्याने सप्तमाध्याये प्रथमः पादः॥१॥ ॥साम्नो॥ कवतीष्विति। कशाद्युक्तासु कयानश्चि
त्र इत्यादिषु ऋक्षु रथंतरं गायतीति द्वादशाहेष्वविवाक्यगतश्रुत्यर्थः। तथा च गीतिवचनत्वविचा
5 रस्यातिदेशार्थत्वात्तद्द्वाराऽतिदेशस्यैव विचार्यत्वादध्यायसंगतिः। आद्याधिकरणे पारिप्लवत्ववि
चारानंतरं तत्सापेक्षश्येनादिवचनातिदेशो निरूप्यत इति पादांतरत्वमानंतर्यं च। मंत्रेति। अहेबु
य ध्नियमंत्रे मेगोपायेमष्वयस्त्रयीविद्दा विदुः। ऋचः सामानि यजूंषि। सा त्वुक्तत्रिविधमंत्रे स्यर्थः। प्र
श्नपूर्वमाह तत्रेति। अत्र पूर्वपक्षे रथंतरादिशब्दवाच्यानामभिवत्यादीनामृचां कवतीष्वतिदेशात्सं
भवात्तल्लिङ्गितत्धर्मातिदेशः सिद्धांते गीतेरेवेति फलं। सूत्रे साम्नोऽभिधायकेन रथंतरादिशब्देन य
थाविशिष्टमध्यापके गीतिविशिष्टमंत्ररूपमनतिक्रम्य प्रवृत्ति व्यवहारः स्यात्॥ ॥इति सप्तमे द्विती श्री एम:
यः पादः॥२॥ ॥उक्तं॥ शीघ्रप्रवृत्त प्रत्यक्षवचननिमित्तातिदेशं पादद्वये विचार्य कल्पनीयवचनप ५
तया विलंबितनामधेयनिमित्तातिदेशस्तृतीयपादे विचार्यत इत्याह इदानीमिति। क्रमेणेतरमिति।

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मैकोउपदेशादेवधर्मेषु सत्तास्याग्निदेवादिचारानर्थक्यादिति भावः ।। स्थितइति ।। द्वितीयइतिशे-
षः ।। उभयोरिति । एकत्र मुख्यमपरत्र गौणमिति विशेषाभावेन जुह्वोति सामानाधिकरण्यान्नामधे-
यमित्यर्थः ।। सिद्धांतमाह एकस्येति । अग्निदेवसत्त्वमिति । नचात्राप्यग्न्यावाहवनीये होत्रमिति तत्सं-
भवः अग्न्याधारतायात्र व्यावर्तकत्वादिति भावः । अधर्मकस्येति । धर्मवत्त्वे हि तद्गुणयोगात्तेष्वपि
केगौणत्वं स्यादिति भावः ।। विधित्सयेति ।। सिद्धसादृश्याभावादमी पिष्टपिंडाः । सिंहाः क्रियंतामितिव-
त्साध्यसादृश्यविवक्षया प्रयोगात्सादृश्यविधिपरत्वमित्यर्थः । सूत्रेऽग्निहोत्रशब्दः कर्मनामधे-
यमित्युक्तं तत्र स्वास्थलेऽस्य प्रकरणांतरे अंगत्वेन विधीयमानधर्माणामतिदेशः ।। अपि ।। वैश्वा-
नरेणाहुष्टोज्योतिष्टोमः प्रायणीयमहर्भवतीत्यर्थः । प्रायणमारंभस्तत्र भवः प्रायणीयं सूत्रे सत्र-
कर्मैणिगवामयनेऽएवाम्नातिः प्रायणीयशब्दः गुणाद्यो ख्रवयवयोगाद्यौ ।। विश्व ।। षाडहिकानामि-
ति । पृष्ठशब्दः सामपरोनस्तोत्रपरः ।। विश्वजित्यकरणे श्यंतं पवमाने कुर्यादाभैवे बृहन्मध्यंदिनए
णोवैरूपं होतुः सामेत्यादिनाषाडहिकानां साम्नामेवव्यावस्थाविधिदर्शनाद्दृष्यवास्तोत्रपरएवं अ-

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰७ न्यायपृष्ठशब्दस्य लक्षणात्प्रसंगात्। यद्यप्याबाधस्य रथंतरशब्दिताहृतानामपि द्याद्यामिकपृष्ठशब्दमु
६ ख्यत्वानुरोधेन रूढिपरत्वात्। अत एव षाडहिकानामिति सविशेषोक्तिरिति द्रष्टव्यं। लिंगसमवायेन
तिएकेन छत्रिणापि छत्रिणइति वद्वत्यमुख्याघटितसमुदायलक्षणयेत्यर्थः। आद्यं पूर्वपक्षं दूषयि
6 त्वा द्वितीमाहचोदकेनेति। बृहद्रथंतरयोः बृहद्रथंतरसामसाधनकस्तोत्रयोः। अत्रोक्तन्यो वि
श्वजितिपृष्ठानां सर्वेतायाश्च विधाववि विनैव विधिव्यापारभेदं समासबलादेव षडहप्रसिद्धविशि
ष्टार्थप्रतीतेर्वषट्कर्तुः प्रथमभक्ष इत्यत्र प्राथम्यविशिष्टभक्षविधाविव विस्पष्टविशिष्टविधायेति
व्यासेविनैव समासं सामानाधिकरण्यमात्रलब्धविशिष्टविधाविव वैचनवाक्यभेदः। विकारएवे
ति। अव्यक्तत्वलिंगाज्ज्योतिष्टोमस्यैव विकारेन तु प्राभाकरोक्तरीत्या षडहस्येत्यर्थः। मैवमिति। प्र
संगात्संगतिरितिभावः। सत्रे विश्वजित्सर्वपृष्ठो भवतीति ज्योतिष्टोमिकानि पृष्ठान्यनूद्यंते। वि श्री एम: ६
श्वजितो ज्योतिष्टोमपूर्वकत्वात्। अस्मिंश्च माहेंद्रादिषु चतुर्षु पृष्ठशब्दः तथा च पृष्ठवत्त्वं ज्यो
तिष्टोम उपपन्नमिति तदनुवादः॥ तथा॥ वारुण्याइति। वारुण्याश्चाभिक्षायाः निष्कासेन पात्र

© Dharmartha Trust J&K. Digitized by eGangotri

लग्नशेषेण पुरोडाशानां तुषैस्तावद्भ्रष्टं कुर्यादित्यर्थः । यंतीति । प्रकृसंज्ञाः प्रमादभ्रष्टदेशागमनानु
वादः सोऽयं चरुं श्रिवे पत्नी स्यादेवोचोदकप्राप्तनिर्वापानुवादवत् तत्राभ्रष्टशब्दः सौमिकावभृथधर्मानि
देशको न वेति मूलचिंतामभिप्रेत्य तदर्थचिंतामाह तत्रेति प्राणीतानाम पां संपवनेन नियुक्तानामंतर्वे
द्यां योऽस्मु तत्सेकस्तमित्यर्थः । तुषनिष्कासमिति । एकवद्भाव निर्देशाच्चमसशब्देन समुदायीकरणेनैका
र्थविधानान्न वाक्यभेद इति सूत्रनार्थः कर्मांतरमिति । तुषनिष्कासद्रव्यकमिति प्रमाणवदिति कर्मा
न्तरे न्याय तः सिद्धे तत्सत्वेन प्रयोगस्य निश्चितत्वात् तत्प्रमाणानाधिकरणमुमेव गौणत्वप्रमाणमितिभा
वः । अप्रमाणकमिति अपांसुतत्सेकप्ररत्वग्राहकाभावादिति भावः । ननु विनैव तत्सर्पग्राहकं स्वतए
न वं गौणत्वं हीतिनस्य स्वारसिकत्वे गौणमुख्यबलाबलविवेकोन स्यादिति भावः । सूत्रे यथा सर्वेष्ट
ष्टशब्दः षाडुहाति देशाकृस्तथावभृथशब्दोऽपि सौमिकधर्माननतिदिशति ॥ द्रव्या ॥ पूर्वोक्तकर्मांतरत्व
संगादिदमित्युत्क्षिप्तेत्य संशयमाह यदिदमिति तिनत्रे । यद्यपि तुषनिष्कासशब्दोऽपि प्रत्यक्षस्तथापि तुषनि ति २
कासस्य कर्मांतरोपयुक्त द्रव्यसंबंधित्वान्न द्रागवभृथ इत्युच्यते तं प्रतीयते पुरोडाशस्य तु कटितीत्याशयः ।
६४ शेषः प्रयोगादिति । एष वै दर्शपूर्णमासयोरवभृथ इत्यत्रेति शेषः । नवाविनिगमनेत्यात्पापि वेति । सिद्धांतयति
सत्यमिति ४६

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा·टी·७ अशक्तेरिति विशिष्टविधिविधेयत्वेतु गौरवमिति भावः। पुरोडाशस्यैवेति। द्रव्यपदंतु कथं चिन्त्येयमिति
७ भावः। चोदनात् विधानात् विशिष्टविधिगौरवं तु तुषनिष्कासपदार्थकत्वाद्गौरवमिति भावः। सत्रे द्रव्य ७२
स्य तु तुषनिष्कासस्य उद्देशे उपदेशेन तद्देवद्रव्यग्रासं श्रुतिसंयोगात् द्रव्योपदेशाभावे हि सौमिकावभृ
थप्रकृतित्वात्ततः पुरोडाशप्राप्तिः॥ गुणा॥ वैस्रवशाखेव भृथशाखवद्धृतिदेशाद्दृत्युत्थानात्संगतिः ७४
आश्ववालादय इति आश्ववालः प्रस्तरः ऐक्षवी विधृती इत्यादय इत्यर्थः। अग्निहोत्रेतिवे स्रवद्रव्यस्य
त्रिकपालद्रव्यसामानाधिकरण्येन कर्मसात्कुर्यादिति पर्यवस्यतीति भावः। श्रुत्याशक्ताविति द्वाते धर्म
लाभस्त्वेकदेवताकत्वौषधद्रव्यकत्वसामान्यादाग्नेयादिति भावः। सत्रे विश्वादिदेवताल क्षणगुण
स्कधर्मान्नगृह्णीयात् उभयत्रापि देवतासंबंधरूपप्रवृत्तिनिमित्तसाम्यात्॥ निर्मे॥ निर्मथ्येने
ति। अग्नेर्योऽप्ययन इति शेषः। बार्हिषेतिपयाविति शेषः। पाशुकस्येति। अग्नेर्जनित्रमसीत्यधिमंथ श्रीरामः
ने शकलं निदधातीत्यादयो निर्मथ्यधर्माः। उत्सवनादय आन्यस्य धर्माः। बर्हिषोलवनादयः। आतिदे ७
शिकी संगतिः॥ सौमि॥ द्वयोरिति द्वयोः पर्वणोरग्निं प्राचीनदेशेनयंतीत्यर्थः। स स्रभिरितिसौमिकं

© Dharmartha Trust J&K. Digitized by eGangotri

तुप्रणायनमव्यां व्यंहीतरत् । उत्तरवेदिप्रतिषेधश्चातद्भुतप्राकृतं वानामप्तानां सरिसंख्यार्थं श्रवणं गु
णार्थमर्थवादो वा । प्रथमोत्तमयोः प्रणायनमुत्तरवेदिप्रतिषेधात् । मध्यमात्तयोर्वा गत्यर्थवादात् ।
श्चोत्तरवेदिकोनारभ्यवादप्रतिषेध इति सप्तम्यार्थं चतुर्भिर्द्वितीयं त्रिभिरिति विवेका । तत्राद्यमाह प्र
थममिति सोमिकं सोमिकप्रणायनधर्मकं निर्मथ्याहोनाम मनतिदेशकत्वेपि प्रणापनिशब्दस्याति
देशिकत्वं भविष्यतीत्युत्थानात्संगतिः नामेति सुबंतत्वाभावेन नामधेयत्वासंभवादिति भावः वच
नानर्थक्यं शंकते स इति परिहरति परिसंख्यार्थो वेत्यादिना गुणोति तत्सन्निधावुत्तरवेद्यामग्निं
निदधातीति श्रुतोत्तरवेदिलक्षणगुणोत्सर्थः । त्रिदोषेति । स्वार्थत्यागः परार्थस्वीकारः प्राप्तबा
धश्चेति दोषा । अर्थवादार्थो वेति यस्मादुयोः प्रणायनमस्ति तस्मात्ताभ्यां गमनं संभवतीति तत्रैय हृः स
मापिं गच्छतीति स्तुत्यर्थ इत्यर्थः । गुणाश्रवणादिति उत्तरवेदिर्विक्रांतेरश्रुता न तु स्ववाक्य इति भावः
स्तु इतरत् प्राकृतं चोदकप्राप्तमवक्तव्यं ॥ प्रथमा । प्रासंगिकी संगतिमत्वाह तत्रैवेति कतरयोरिति अ
न्यघन इति शेषः । द्वितीयं पक्षमाहनेति वा तालात्सुरीय मातृत्य वेद्याय योत्तरवेदिर्भवति न थापुरीषंन

© Dharmartha Trust J&K. Digitized by eGangotri

शा·दी· निर्वपेदित्यर्थः चात्वालपुरीषेणोत्तरवेदिं न कुर्यादिति यावत् न तयोर्वेदित्वप्रतिषेधगामित्यो
८ त्तरवेदिप्रशस्याप्रणयनं न योरेव व्यवस्थाप्यत इत्यर्थः उक्तमुपपादयति प्रणयनांगमिति
9 यद्यपि प्राकृतमिदं प्रणयनं प्रकृतौ च प्रणयनस्योत्तरवेदिं अंगत्वाप्यत्र प्रकरणे उत्तरवेद्या
मग्निनिदधातीति विधानात्प्राकृतेप्यस्मिन्प्रणयने उत्तरवेदिरंगत्वाच्च प्रथमोत्तमयोरुत्तर
वेदिविधानान्न वैश्वदेव इति प्रतिषेधात्तु विकल्प इति भावः। ननु कृत्वेति ऊरुवाप एतद्यज्ञस्य यदुरु
णप्रघासाः साकमेधाश्चैत्यनेनेति शेषः यदुक्तं प्रयोजनं वक्ष्यत इति तदिदमेवेत्याह तदर्थतां
दस्येति द्वयोरन्तर्हितस्य व्यवस्थायामपि चोदकप्राप्तस्य प्रणयनस्येतरयोरपि सत्त्वाद्यर्थं पुनः
कीर्तनमिति शंकते भवत्विति गुणार्थमिति स्ववाक्ये गुणाभावात् गुणविध्यर्थत्वासंभवेपि वा
क्यांतरविधीयमानस्योत्तरवेदिलक्षणगुणस्य मध्यमयोरुपसंहारार्थमित्यर्थः। न हेवाहाग्नि श्रीरामः
न्हीति द्वयोर्वेति अग्निनिधानानुवादेन विहितोत्तरवेदिर्द्वयोः प्रणयंतीति सन्निहिताग्निनिधानार्थे ८
वेत्युत्तरवेदिरपि मध्यमयोरेव व्यवतिष्ठते नेत्यर्थः स्यादिति विशिष्य सन्निहितालाभादिति भावः न

© Dharmartha Trust J&K. Digitized by eGangotri

न्वेवं प्रथमोत्तमयोरुत्तरवेद्याः प्रसक्तभागात्प्रतिषेधानर्थक्यं तत्राह यत्विति प्रतिषेधार्थमिति·
पर्युदासार्थमित्यर्थः अन्यथा विहितप्रतिषेधे विकल्पापत्तेः अविधीयमान इति प्रणयन इति
शेषः सर्वेष्विति सन्निधानात्प्रकरणस्य प्राबल्यादिति भावः उत्तरवेद्या उत्सन्नविधेः प्रतिषेध
विषयत्वे उत्सन्नानुरोधेनेत्यग्निनियोगस्य मध्यमविषयतायाः सिद्धेस्तदुपसंहारो न हृद्ययोः प्रणयन्ती
त्यस्य प्रयोजनमित्याह अपि चेति। यस्तं प्राभाकरः अर्थवादैस्तस्माद्द्वाभ्यामेतौ सर्थवादं प्रणयन
विध्येकवाक्यत्वेन समर्थयत इत्यर्थः आनर्थक्यमिति हृद्ययोः प्रणयन्ती त्यस्येति शेषः उत्करीत्येव
तिभावः न संभवतीति प्रतिषेधे पर्वहृद्ये विधिप्रतिषेधाभ्यामुत्तरवेदेर्विकल्पः प्रतिषेधे पर्वहृद्येति
त्यमुत्तरवेदिः स्यात्तन्न तस्योपात्तत्वप्रणयंती त्यस्य पर्वहृद्ये विकल्पेनोत्तरवेदिविधायकत्वं पर्वहृद्येति
त्यनयेति वैरूप्यापत्तिः पर्युदासे त्वविशेषेण पर्वहृद्य संबंधबाधापत्तिः अतो न वैश्वदेव इतीति
त्यानुवाद एवेति तद्बलात्पात्र प्रणयंती त्यस्य मध्यमपर्वविषयत्वासिध्या हृद्ययोः प्रणयंती त्यस्येव
व्यवस्थापकत्वात्तवैयर्थ्यमिति भावः प्रलप्यत इति प्राभाकरेणेवेति शेषः बालेति प्रतिषेधा

© Dharmartha Trust J&K. Digitized by eGangotri

५४ इति । अस्यान्तरवेद्यामुत्तराग्निविधित्वात्प्रकरणबलेन सर्वपर्वसूत्तरवेदिविनियोजकश्रुतिकल्पनापत्तेस्तेन विधिबलेन X

शा.टी. ९ संभवे विपर्युदासः संभवस्त्वेवान्यथानुपपत्त्या नार्थेयं हीनेत्याहो कोपि सन्नस्यादिति भावः । क
थं विदिति द्वयोः प्रणयंती त्वस्योपदेशात्वादुपदेशश्चोपदेशात्मुणे द्व लयतीति न्यायेनोत्तरवेद्यामग्निं नि
दध्यात्तो त्वुपदेशो हुलकृतयास्त्वविषयपर्वद्वयेण्योत्तरवेदिच्यास्यापकृत्वमिति तिनइकरीत्वेवेत्यर्थः
सिध्यतीति । तथा च द्वयोरित्यस्यानवेयर्थ्यमिति सर्थः । अन्यत्वं सन्धित्सतो न्यस्य च्यवतइति न्यायेन
द्वयमिति तत्रेति अपेक्षत्वौद्वित्यर्थः व्यवस्थायेति प्रत्यक्षवचनेन तयाम्नादिति प्रवृत्ते न पर्वद्वयवि
नियोगविषयेणोत्तरवेद्यामग्निमितिवचनेनकृतेपत्यर्थः ततश्चेति । सर्वपर्वसूत्तरवेदिप्राप्त्यभा
वादित्यर्थः अस्तितिनित्यानुवादत्वांगीकारादिति भावः । प्रयोजनेनेति उक्तानर्थकत्वशंकायामु
पात्तवपंक्तिसविशेषविहितोत्तरवेदिप्रतिषेधार्थकत्वरूपप्रयोजनकथनार्थमित्यर्थः तथा च
नित्यानुवादत्वे सत्त्रविरोध इति भावः सर्वमिति सप्तसूत्रमित्यर्थः । द्वितीयपक्षमाह परिसंख्येति प
रिसंख्यार्थत्वे तदसंभवो शर्वमेव प्रपंचितो सधर्मकमिति अतो नानर्थक्यमिति भावः । तथा चेति । सोमि श्रीरामः
कप्रणयनांगत्वेनोत्तरवेदिप्राप्तौ सत्यामेव तत्स्याः प्रतिषेधः पर्युदासो विकल्पनेनान्यथापर्युदासस्य ९

© Dharmartha Trust J&K. Digitized by eGangotri

आग्नेसापेक्षत्वादित्यर्थः ॥ नन्वयं पर्युदासो न सौमिकप्रणयनपरत्वे लिंगमुपात्ते निवाचनिकोत्र
२२ नैवेदिपर्युदासत्वेनाप्युपपन्नेरत आह नचेति न तु सौमिकमपीदं गतस्यार्थवादत्ववशान्माध्यमविषयं न द
गमुत्तरवेदिरपि तत्रैवेति तत्पर्युदासोर्थवान्न तत्राह नत्वित्वेति सौमिकत्वपक्षे इत्यर्थः ॥ तदुभयाला
दितिन्तथा च प्रथमोत्तमयोः पर्युदासोत्तरवेदिकप्रणयने सतिउपात्तेत्युत्तरवेद्यामग्निमितिच म
ध्यमविषयं संपद्यत इति भावः ॥ यदि चेति गत्यर्थवादत्ववशादिति शेषः ॥ व्याघात इति ॥ विकल्पांगीका
रे स एव दोषः अर्थवादस्य ऊरुमात्रो मध्यमो न ताभ्यां गमनं भवति किंतु पादमात्राभ्यां प्रथमोत्तमा
भ्यामेवेति कथं चिन्त्य इति भावः ॥ प्राकृतापेक्षया विशेषं दर्शयति यथेति ॥ द्वाविति अत्र धर्मपुरस्तानि
प्रस्थानताराविर्त्यर्थः ॥ यथाक्रमेणेति परिसंख्यार्थत्वगुणार्थमर्थवादो वेति सत्रं प्राकृतपक्ष
स्य प्रयोजनमिदं परं प्रथमयोः प्रणयनमुत्तरवेदिप्रतिषेधादिति सत्रमुत्तरवेदिवर्जे सौमिकप्रणय २३
ने प्रथमोत्तमयोः कर्तव्यमिति मध्यमपक्षप्रयोजनपरं मध्यमयोर्वा गत्यर्थवादादिति सूत्रं गत्यर्थ
वादत्ववशाद्दक्षिणप्रणयने मध्यमोत्तमयोः कर्तव्यमिति सिद्धांतप्रयोजनपरमित्यर्थः ॥ उत्तरवेदीति न

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰७ नुष्ठानायकोगजयाच्चामोऽन्नरवेहिवपुष्टोसार्थः येननत्कुलेनसोमिकमिमेहंग्रराणयनंस्याहितिभावः
१० अवांतरप्रकरणाहरणात्रयासाद्येसुक्तंनिराकरोतिसामान्येति॥ स्वर॥ चोदनालिंगाद्विशेषाति
देशस्याश्मिकस्यापिनामधेयायवाहसंगाद्त्रसंगतिमभिप्रेत्यविषयंदर्शयति गवामयनइतिस्व
10 रसामानाकाहर्विशेषाउक्थ्यसंस्थाः सप्तदशस्तोमकाः गवामयनेविषुवदारव्यादिवाकीर्त्यस्या
न्हः उपरिष्टात्परस्ताच्चत्रयस्त्रय आम्नाताउक्थ्याः सप्तदशाः स्वरसामानः अभितोदिवाकी
र्त्यसहस्त्रयः स्वरसामानोभवंतीत्यनेनेत्यर्थः। अन्यत्रेतिअहर्गणांतरेष्वाद्राशविषयर्थे। अ
न्यत्रापीतिअनन्वंध्यायाः स्थानेमैत्रावरुण्यामिक्षाच्चरुभवेवारुणएककपालश्चपनइत्य
र्थः। गुणेति। स्वराख्यसामलक्षणगुणविधिः स्वरसामशब्दः एककपालामिक्षायागवाचपिद इत्यर्थः।
व्यलक्षणगुणविधीककपालामिक्षाशब्दोपवृंहितेभ्य इत्यर्थः। स्वरसामत्वेककपालत्वामिक्षा
त्वचोदनासामान्याहितियावत् स्वरसामत्वेतिस्वरसामत्वचोदनाशब्दाःउपवृंहितायेतेभ्योलिंगे एभ्यः
भ्यइतिबोध्यं। अन्यार्थलिंगदर्शनोनास्वतोनिष्पयकत्वाभावात्स्वतोनिष्पादकचोदनासामा १०

© Dharmartha Trust J&K. Digitized by eGangotri

न्योपदं द्रव्यकत्वस्येवोचितत्वात्। सूत्रे अतिदेशकमिति शेषः॥ कर्मा॥ अस्यप्रासंगिकी संगतिमभिप्रेत्याह
तं कीर्तयति। कर्मेति॥ संस्कारेति। स्रुवो यूपो भवतीत्यादौ स्रुवस्यैव संस्कारविधानेप्यतिदेशनिमित्तत्वो
क्तिः संस्कारजनकक्रियाक्षेपकत्वाभिप्रायाबोध्या। किंस्यात् इत्यतनेनैवाधिकरणांगचिंतामुक्त्वा या
मत्वा फलचिंतामाह वासोदत्त्वा नीति। क्रियाभिव्यंग्येति। क्रियान्वयव्यतिरेकौ जातिव्यंजकतयान्यथा
सिद्धावितिभावः। सूत्रेकर्मजेक्रियाजन्ये क्रियाग्रहत्वात्प्रवत्॥ विप्रा॥ वासः शद्बस्य संस्कृतवचनत्वनि
राकरणप्रसंगाद्गाहग्निशद्बस्यापितन्निराकरणात्संगतिः गर्गत्रिरात्रे आज्यदोहाख्यसामानिप्रकृत्यश्रु
ते आग्निमित्यादौ संशयमाह किमिति। सूत्रे लौकिकं वैदिकं चेति विशये लौकिकं स्यात्स्व वार्थत्वान्नतु वैदि
कं अर्थानिर्देशात्। होमाद्दिप्रयोजननिर्देशेन निराकांक्षत्वात् अत्र न वैदिकमर्थ निर्देशाद्दिति गुणसूत्रम
प्येकीकृत्य लिखितं॥ संस्कृ॥ उपशयइति। यूपैकादशिन्यांश्रूयतइति शेषः। सर्वेषां यूपानां दक्षिणत अपशे
त इत्युपशयः काष्ठविशेषः सयूपइत्यर्थः। तत्रेति। अयं फलसंशयः अधिकरणांगसंशयस्तु यूपशद्बोध
र्मातिदेशको नवेतिद्रष्टव्यः। द्रव्यसंस्कारनाम्नोतिदेशकत्वमुक्तं क्वचिदपवादइति संगतिः सूत्रे उपशयइत्यं

© Dharmartha Trust J&K. Digitized by eGangotri

शा·टी·७ संस्कृतं पूषभागाद्यभिधेयसंस्कारकं स्यात्संस्कारवाचकपूषशब्दश्रवणात्। कर्म। अतिदेशस्य पर्यव
११ सानमाह दृष्टसदृशानीति यथायथं दृष्टसदृशैः कर्मभिरितिकरणान्तं व्याख्यातं तथापि त्यांसादृश्यस्य
सिद्धत्वभ्रमवारणाय साध्यानं स्फुटयन् कर्मेत्यमाहेति बोध्यं ननु विधेयकर्मविशेषावगतिज्ञानान्न
सदृशकर्मविधिरित्याशंकामिहैव परिहरति तानि चेति रथंतरादिविधितिनदाश्रये च अभिनाप्र रत्यादिमं
त्रेषित्यर्थः। अर्थवादगतपूषशब्दस्यानतिदेशकत्वेपि विध्युद्देशगतपूषशब्दस्यातिदेशकत्वमित्यु
क्तत्वान्नासंगतिः। अपूर्वमिति प्रकरणान्तरन्यायादिति भावः। प्रकृतिवत्स्वयार्थोक्तिपूर्वकं पर्यवसि
तार्थमाह उपतिष्ठतीति धातुरिति कर्मभिरिति न्यायलब्धं कर्मान्तरमेव करणाद्दृष्टपदं सदृशपरं सन्न विशेष
समर्पकमिति भावः। धर्मलक्षणेति शब्दद्वयलक्षणापेक्षया एकस्य गौणी ज्यायसीति भावः। वाचकइति
तथा च न शब्दद्वयलक्षणा किंत्वेकस्यैव सा च गौणी ज्यायसीति भावः। मंत्रकरणइति। उपान्मंत्रकरण
इति पाणिनिसूत्रादिति भावः। अनेन उपतिष्ठतिना न तु समीपस्थितेरभिधानार्थत्वेप्यभिधानएवमंत्रः श्रीएमः
करणं न समीपस्थितौ तत्राह प्रधानेति प्रधानभूतसमीपस्थितिकार्यं साधयन्मंत्रः समीपस्थितौ ११

© Dharmartha Trust J&K. Digitized by eGangotri

करणमित्यर्थः। मंत्रकरणार्थ इति मंत्रः करणं यस्मिन् समीपस्थाने सोऽर्थोऽभिधेयो यस्य स इत्यर्थः। न
न्वेवमभिधानवाचकशब्दाभावान्नाभिधानविधिरित्यत आह तेनेति समीपे स्थितत्वेनेति अभित्वाशूर इत्या
दिसंबोधनेनार्थसिद्धसमीपस्थितत्वानुवादः ननु तर्हि शब्दो विधिरिति चेन्नोच्यते। सत्रे पृष्ठशब्दः स्तोत्रकर्मवाच
कः रथंतरं पृष्ठं भवतीत्यादौ स्तोत्रवाचकत्वेन स्यात्राग्युपदेशात्॥ ॥इति श्रीचंपकनाथकृतौ शास्त्रदी
पिकाप्रकाशे सप्तमाध्याये तृतीयः पादः॥३॥ ॥इति कर्तीति॥ ॥प्रत्यक्षवचनातिमिताद्दशविचारा
नंतरं कल्प्यवृत्तिकतया ततो विलंबितनामधेयनिमित्तातिदेशविचार्योनंतरं हि प्रत्यक्षवचनसेवकल्प्य
तया नामापेक्षया विलंबितेन चोदकालिंगानुमितशब्देनातिदेशो विचार्यत इति पादभेदमानेन तर्थं चाभित्रे
त्याहगत इति प्रदिश्यते अतिदिश्यते लौकिके स्मार्ते सत्रे इति कर्तव्यताया उपदेशेनाविधानाद्यागस्य सो
यदि पूर्ववत्त्वं अस्ति काचिदस्तु कामिरिति सामान्यतः प्रवृत्तेति मतं॥ प्रवृत्तस्मिन्नेव विषये विशेषविचारं रूप
त्वादुत्तरस्य॥ लौकिकस्याद्दृष्टप्रवृत्तित्वादिति पूर्वपक्षसूत्रमलिखित्वैवाधिकरणांतरमारभते। स्थित
इति ननु शास्त्रीयाच्यवस्थितास्तच्चाकांक्षयातु कल्प्यतां तत्राह न च शास्त्रमिति शास्त्रैकगम्येन कल्प्य

© Dharmartha Trust J&K. Digitized by eGangotri

नात्र सरस्तीति भावः वैदिकाभावे कथं प्रयाजे प्रयाजे कृष्णलं जुहोतीत्यादि प्रयाजदर्शनं तत्राह प्रयाजेतिनि
सेति अपि वान्यायपूर्वत्वाद्यत्रनित्यानुवादवचनानि स्युरिति सूत्रं तस्यायमर्थः। प्रयाजादिदर्शनं न
वैदिकेतिकर्तव्यतायां लिंगम् न्यायपूर्वकत्वात् न्यायपूर्वकं हि लिंगं न चेदं तथा वैदिकानि बहूनि तथा
न्यायाभावात् यत्र प्रयाजाः दर्शपूर्णमासयोस्तत्रोत्कर्षः नार्षेयं वृणीते इत्यादि नित्यानुवादः पृषदाज्येना
नूयाजान्यजतीत्यादि पृषदाज्यविशिष्टानूयाजादिविधिरिति सामान्येनेति उपमानेनेत्यर्थः तथा
च पौरुषेयानुमानमपेक्ष्य वैदिकत्वसादृश्यरूपमुपमानं बलवदिति भावः। विज्ञानोपयज्ञः स एव वैतानि
कः विनयादित्वात्स्वार्थे ठक् यज्ञकर्माधिकृतस्य त्रयीप्रवर्तितेन त्रयज्ञानामेव प्रतिपादनादित्यर्थः अवैता
निकं मलवद्वाससा व्रतकलापादि अवैतानं शेनि स्वाधिकारप्रवृत्तत्रयीकल्परूपमित्यर्थः नन्वप्रासंगिक
मपि वेदाभिधेयं तत्र अन्यथा तत्र वेदानुमानं न स्यादित्यस्वरसादाह। किंचेति। वैतानिके विज्ञानप्रयोजनके प्र
योजनमिति ढक् समानविधानत्वे एकप्रकरणोपदिष्टस्योपदेशेनेवान्यत्रनयने अनुमानेनेति सौमि
दिकं पार्वणस्थालीपाकेतिकर्तव्यतायोगि इतिकर्तव्यतोपदेशोपि न्याय्यादृष्टार्थकर्मत्वादृष्टकादिवदित्यतु

© Dharmartha Trust J&K. Digitized by eGangotri

मानेनेत्यर्थः गणेति मानगणाया गादिष्विसर्थः। इत्यं भावः प्रकारपदार्थानामप्रगतिदेशइतिप्राभा
करमततद्दूषणायाह सचेति रूपितः विशिष्टज्ञापकइति उपकारविशिष्टप्रकारातिदेशएवोपकारज
नकपदार्थानामप्यर्थात्ज्ञापकइत्यर्थः। पदार्थानामुक्तरीत्यातिदेशे सूत्रविरोधमत्राह तद्विधार्थी
ति प्रकृतोपदार्थज्ञापकं सच्छास्त्रमतिदेशोपकारकमित्यभिप्रायं सूत्रमितिभावः। विध्यंतः प्रधान
विधिव्यतिरिक्तं कृत्स्नं पौरोडाशिकं कांडं सौर्यादिचोदनायां दर्शपूर्णमासादिवदित्यतिदिश्यत इति
सूत्रार्थः तथाच तत्प्रयाजादेरुत्कर्षादिकल्पनीयमितिभावः। अभ्युपगमवादेनाह अस्तुवेति ननु
यदि शास्त्रातिदेशस्तर्हि कृष्णलादिष्ववहननादीनां शास्त्रचोदितत्वात्सर्वौषधावहंतिवत् दृष्ट
कल्पयित्वानुष्ठेयत्वं प्रकृतिवदेव च सौर्यादावप्यग्नयेजुष्टमित्यधिकृत्यएव मंत्रः प्रयोज्यः स्यादित्य
दृष्टबाधो न स्यातामित्यत आह तथापीति निरूपितेति निरूपितं अवगमितं रूपं यष्टव्यदेवताप्रकाशकत्व
रूपं येन तस्येत्यर्थः। नत्विति। सौर्यादावग्निदेवताभावादस्यार्थत्वापत्तेरितिभावः। कैमुतिकन्यायेनाह
यत्रापीति। तथाच किमुवक्तव्यमनुमितवचनातिदिष्टब्राह्मणविषयेष्वित्यर्थः।। निरूपितरूपस्यातिदेशो

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰७
१२
13

ऊहबाधसिद्धिं विवक्षेतदसिध्यादहृदयमितिपदेहि ही त्यादिना कथं नन्वग्निपदपाठस्तत्राह हेत्वेनेति। तद्रूप
ति देवताप्रकाशके त्यर्थः। स्वरूपस्येति अग्नित्वस्ये त्यर्थः॥ हाहा॥ चोदकनामधेययोरिति देशाग्रामा एवे
विचारानन्तरं प्राप्तावसरतया बलाबलं चिंत्यत इति संगतिं मत्वाह इदानीमिति आनुमानिकवचनप्रा
माण्यं विशेषानिर्देशं विना न पर्वस्य नीतिं तदनन्तरकार्यापन्नागमने वक्ष्यमाणन्यायेन भाविपर्यवसानमाश्रि
त्येयं चिंतेह क्रियते गणेति। गवामयने मितिं विरुद्ध षडहे ज्योतिर्गौरायुरिति ब्रह्म भवंतीति श्रुता इत्यर्थः
नामधेयस्य प्रत्यक्षतया न्यत्र प्राबल्ये पि प्रकृते आनुमानिकस्यापि चोदकस्य प्राबल्ये हेतुमाह फलेति
प्रयोगे ति प्रजाकामा गवामयनमुपेयुरिति वाक्यादित्यर्थः। गणेति प्रयोगवाक्ये गम्यमाना नादि ति शेषः। अन
तिदेशेनामानर्थक्यं स्यात्तत्राह फलसंबंधस्त्विति अभ्युपेत्य युक्तिमाह किंचेति। भाव्यविशेषज्ञानोत्तरमे
वेति कर्तव्यताकांक्षा न भाव्यसामान्यज्ञान इत्यभ्युच्चयत्वं तत्रोक्तरीत्या नामधेययुक्ते षडहे स्वविरुद्धा श्रीराम:
द्ध्येपि कार्यविरुद्धाः स्तनामप्रापिता-विरुद्धाश्चाप्यस्तु त्याकालाये सर्वेषामन्तं तेनानुष्ठेयास्तेन धर्माभ १२
योनुग्रहन्यायेन चोदकप्रापिता एव कार्या न नामप्रापिता इति सूत्रे आह गोगवामयने द्वादशाहिकमेव

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मजातं प्राप्यते अहर्गणस्य द्वादशाहप्रकृतिकत्वात् ऐकाहिकं ज्योतिरादिनामतु ज्योतिष्टोमादधि
कानां धर्माणां सङ्घावान्तु मध्ये ज्योतिरादेः प्रवृत्तेरिहापि द्वादशाहिका अधिकाः संतीत्यैकाहवदधिका
गमसामान्यादनुवादो नातिदेशकं बुद्धिसौकर्यार्थं वृत्तवर्तिष्यमाणाध्यायाद्वयार्थसंग्रहश्लोकास्तिश्लोके
नवचनादिति॥ ॥इति श्री चंपकनाथकृतौ शास्त्रदीपिकाप्रकाशे सप्तमाध्याये चतुर्थः पादः॥४
सप्तमोध्यायः समाप्तम् ७ शुभमस्तु श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकं ब्रह्महत्यादि
पापघ्नमिति वेदविदो विदुः १ श्रीराम रामेति जना ये जपंति च सर्वदा तेषां भुक्तिश्च मुक्तिश्च भविष्य
ति न संशयः॥ २॥ श्रीमते रामानुजाय नमः॥ ॥ ॥छ छ ॥ छ छ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इति स्वदीपिका [illegible] प्रकाशटीका सप्तमाध्यायः [redacted]

2bED

© Dharmartha Trust J&K. Digitized by eGangotri